सा० पर
पृ० १

१

अथ विभक्तिर्विभाव्यते स्यादिर्ध्यादिस्त्यादिश्च विभक्त्यंतं पदं तत्र।
स्यादिर्विभक्तिर्नाम्नो योज्यते अ विभक्तिर्नाम विभक्तिरहितं धातु
वर्जितं चार्थवच्छब्दरूपं नामोच्यते कृत्तद्धितसमासाश्च प्रातिपदि-
कसंज्ञिकाः इति केचित् तस्मात् सि औ जस् अम् औ शस् टा भ्यां
भिस् ङे भ्यां भ्यस् ङसि भ्यां भ्यस् ङस् ओस् आम् ङि ओस्
सुप् तस्मान्नाम्नः परस्मादयः सप्त विभक्तयो भवंति तत्राप्यर्थमात्रे
कर्तृविवक्षायां प्रथमैकवचने देव सि इति स्थिते इकार उच्चारणार्थः
सो विसर्गः सकाररेफयोर्विसर्जनीयाद्रेणोभव नाधातोरसे पदं
तेच देवः द्वित्वविवक्षायां औ औ औ देवौ बहुत्वविवक्षायां बहुवच-
नं जस् जकारस्य इतिसंज्ञायां लोपः प्रयोजनं च जसीति विशेषणार्थं
दीर्घविसर्गौ देवाः अकाराज्जसो सुक् क्वचिद्वक्तव्यः देवासः ब्राह्मणासः

म ऐ

3

न्य अन्यतर इतर डतर कतर कतम सम सिम नेम एक पूर्व
पर अवर दक्षिण उत्तर अपर अधर स्व त्यद तद यद एतद्
इदम् अदस् द्वि किं भवत् युष्मद् अस्मद् एते सर्वादयः त्रिलिं
गा नत्वपुंलिंगे रूपमेतत् सर्वः सर्वौ सर्व जस इति स्थिते जसो ई
र्वादेरकारांतात्परो जस् ई भवति सर्वे सर्वं सर्वौ सर्वान् षृवर्णान्नो
ऽन्ते षकाररेफऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति:
अंते स्थितस्य न भवति यथा सर्वान् इत्यादौ अवकुप्वंतरेपि अस्व
स्वाहाद्यैः णकवर्गेण पवर्गेण च मध्ये व्यवधानेपि णत्वं भवति नात्ये
न सर्वेण सर्वाभ्यां सर्वैः सर्वादेः स्मट् सर्वादेरकारांतात्परस्य च
तुर्थ्येकवचने स्मडागमो भवति सर्वस्मै सर्वाभ्यां सर्वेभ्यः अतः
सर्वादेरकारांतात्परस्यातः स्मडागमो भवति सर्वस्मात् सर्वाभ्यां

घचरचऋ
अघः तस
नघुः ।५।।

सर्वेभ्यः सर्वस्य सर्वयोः सुडामः सर्वादेः परस्यामः सुडागमो भव
ति सर्वेषां ङेः स्मिन् सर्वादेरकारान्तात्परो ङिः स्मिन् भवति सर्व
स्मिन् सर्वयोः सर्वेषु हे सर्व हे सर्वौ हे सर्वे इत्यादि एवं विश्वा
दीनामकारान्तपर्यन्तानां रूपाणि उभय डतर डतमौ विहाय ये प्रत्य
याः एवं डतरडतमान्तानां तु नपुंसके वा जस औकारो वक्तव्यः एवं एकः परः पुनः
इत्यादि ङसः स्मात् स्मिन्नौ वा वक्तव्यौ एकस्मात् एकात् एकस्मि
न् एके इत्यादि प्रथमचरमतयडल्पार्धकतिपयनेमानां जसी
वा प्रथमे प्रथमाः चरमे चरमाः शेषं देववत् तयायडौ प्रत्ययौ
नेमे नेमाः शेषं सर्ववत् द्वितीयस्य सर्वादेर्ङे ङसि ङि स्मै वा वक्तव्य
द्वितीयस्मै द्वितीयाय द्वितीयस्मात् द्वितीयात् द्वितीयस्मिन्
द्वितीये एवं तृतीयः उभशब्दस्य नित्यं द्विवचनान्तो उभौ उ

भौ उभाभ्यां उभाभ्यां उभयो उभयोः उभयशब्दस्य द्विवचना
भावः एकवचनबहुवचने भवतः उभयः उभये उभयं उभ
यान् उभयेन उभयैः उभयस्मै उभयेभ्यः उभयस्मात् उभ
येभ्यः उभयस्य उभयेषां उभयस्मिन् उभयेषु हे उभय हे
उभये मासस्य लोपो वा मासशब्दस्य ककारस्य लोपो वा भवति स
र्वविभक्तिषु परतः इति केचित् मासादीनां स्वरे परे हसेपः से लोपः
हसात्तादीर्घात्तश्च परस्य सेर्लोपो भवति माः मासौ मासः इत्या
दि मासादीनामलोपो वा मासादीनामादित्यहृल्लेखनिशामनयोः
विकल्पः पदे माः मासौ मासाः इत्यादि अकारान्ताः पुंलि
गाः सोमपाशब्दः सोमपाः सोमपौ सोमपाः सोमपां सोमपौ
सोमपा आम्शसोरिति स्थिते आतो धातोर्लोपः धातुसंबंधिन

कारस्य लोपो भवति आतो धातोः स्वरे परे सोमपः सोमपा सोमपा
भ्यां सोमपाभिः सोमपे सोमपाभ्यां सोमपाभ्यः सोमपः सो
मपाभ्यां सोमपाभ्यः सोमपः सोमपो सोमपां सोमपि सोम
पोः सोमपासु अधातोरिति किं [illegible] लोपो नास्ति हे सोम
पाः हे सोमपौ हे सोमपाः एवं कीलालपा [illegible] स्वपा [illegible]
प्रभृतयः इकारान्तः पुल्लिंगः हरिशब्दः हरिः औ इकारान्ताद
कारान्ताच्च परो औकारो [illegible] आपद्यते ईकं भवति हरी [illegible]
सि इकारान्तस्य उकारान्तस्य च जसि परे एकारो ओकारश्च भ
वति हरयः धौ इकारान्तस्य उकारान्तस्य च [illegible] एकार ओ
कारश्च भवति हे हरे हे हरी हे हरयः हरिं हरी हरीन् टाना
स्त्रियां इकारान्तादुकारान्ताच्च परस्य टा ना भवति [illegible] या हरिणा

हरिभ्यां हरिभिः ङित्ति इकारांतस्य उकारांतस्य च ङित्ति परे एका
रउकारस्य अ भवति हरये हरिभ्यां हरिभ्यः ङसिङसोरस्य प
रो ह्रस्वापरस्य ङसिङसोरकारस्य लोपो भवति हरेः हरिभ्यां ह
रिभ्यः हरेः हर्य्योः हरीणां ङेरौ ङित् इदुद्भ्यामुत्तरस्य ङेरौ भवा
ति ङित्ति टेः ङित्ति परे टेर्लोपो भवति हरौ हर्य्योः हरिषु एव
मग्निगिरिरविप्रभृतयः उकारान्ता अपि विष्ण्वायुभानुप्रभृत
यो पतेरेवं स्युः सिध्यंति भावभान भानवः उत्यादि सखि शा
हस्य भेदः सेडौदेः सखिशब्दान्परस्य सेरधेडौ गामो भवति डि त्वा
टिलोपः सखा अघेरिति विशेषणाधिकारो सिध्विषये हे सखे एव
पेवरखुः सखिशाहस्यैकाररादेशो भवति पंचसु परेषु षष्ठीनि १९

सखिशब्दवत् पतिः समासे एव सखिशब्दवत् वक्तव्यः द्वौ द्वौ स्वरे
ततः समासान्तस्य नादयो भवंति प्रजापतिना प्रजापतये इत्या
दि द्विशब्दो नित्यं द्विवचनान्तः द्विशब्दस्यति त्यदादेष्टेरः स्यादौ
त्यदादेष्टेरकारो भवति स्यादौ परे द्वौ द्वौ द्वाभ्यां द्वाभ्यां द्वाभ्यां
द्वयोः द्वयोः त्यदादीनामदर्भावः त्रिशब्दो नित्यं बहुवचनान्तः
त्रेस्त्रयो जसि इत्येकारः त्रयादेशः त्रयः त्रीन् त्रिभिः त्रिभ्यः त्रिभ्यः
त्रेस्त्रयड् त्रिशब्दस्य त्रयडादेशो भवति नामि परे डिन्तस्य वक्तव्यः
त्रयाणां त्रिषु कतिशब्दो नित्यं बहुवचनान्तः कतिशब्दाज्जस्शसो
र्लुग्वक्तव्यः लुकि नलुक्निमित्तं लौकिकसति तन्निमित्तकार्यं न
स्यात् कति कति कतिभिः कतिभ्यः कतिभ्यः कतीनां कतिषु त्रिषा

लिंगेष्वेवस्वरूपोयं ईकारांतःपुल्लिंगः सुश्रीशब्दः सुश्री ध्वोईतो
रियुवौ स्वरे धातोरीकारोकारयोरियुवौ भवतः स्वरे परे सुश्रियौ सु
श्रियः हे सुश्री हे सुश्रियौ हे सुश्रियः सुश्रियं सुश्रियौ सुश्रियः सु
श्रिया सुश्रीभ्यां सुश्रीभिः सुश्रिये सुश्रीभ्यां सुश्रीभ्यः सुश्रियः
सुश्रीभ्यां सुश्रीभ्यः सुश्रियः सुश्रियोः सुश्रियां सुश्रियि सुश्रि
योः सुश्रीषु इत्यादि नयैवं सुधीशब्दः ऊकारांतःपुल्लिंगः स्व
यंभूशब्दः स्वयंभूः स्वयंभुवौ स्वयंभुवः स्वयंभुवं स्वयंभुवौ
स्वयंभुवः स्वयंभुवा स्वयंभूभ्यां स्वयंभूभिः स्वयंभुवे स्वयं
भूभ्यां स्वयंभूभ्यः स्वयंभुवः स्वयंभूभ्यां स्वयंभूभ्यः स्व
यंभुवः स्वयंभुवोः स्वयंभुवां स्वयंभुवि स्वयंभू

५

वोः स्वयंभुषु हे स्वयंभूः हे स्वयंभुवौ हे स्वयंभुवः इत्यादि सेना
नीशब्दस्य विशेषो ह्रस्वादेशः स्वरादेशो विशेषः सेनानीः य्वौ वा धा
तोरवयवसंयोगः पूर्वो यस्मात् ईकाराहूकाराच्च नाम्नि तदंतस्य
कस्वरस्य ईकारस्य ऊकारस्य यकारवकारौ भवतः स्वरे परे वर्षा
भूः पुनर्भूः व्यतिरिक्ते स्वधीशब्दो वर्जयित्वा वाग्रहणादिदं विकल्पा
सेनानीः सेनान्यौ सेनान्यः हे सेनानीः हे सेनान्यौ हे सेनान्यः सेना
न्यं सेनान्यौ सेनान्यः सेनान्या सेनानीभ्यां सेनानीभिः इत्यादिः
सेनान्यां इनां वा सोनहदन्त्यः सेनानीनां सेनान्यां आम्ङे आवृ नो
नीशब्दाद्योत्तरस्य ङे आमादेशो भवति सेनान्यां सेनान्योः सेनानीषु
वर्षाभूः वर्षाभ्वौ वर्षाभ्वः एवं पुनर्भूरपि भवति ग्रामणीग्रामण्यौ

सा०
ए०

ग्रामण्यः वातप्रमीशब्दस्यभेदः अमिवातप्रमीमाह्व्याअमिवातप्रमीति
ङौवातप्रमीशो घग्रामणी गह्णीभवेत् ग्रम्भजयः उकारांतात्स्वय
वत्सम्भूतयः ऋकारांतःपितृशब्दः सेवा ऋकारांतात्परस्यसे
रामवति सचचडित् डित्वाट्टिलोपः पिता अरपंचसु ऋकारोभ
वति पंचसुपरेषु पितरौ पितरः शेषेष ऋकारांतात्परस्यशेषेषु
भवति सचडित् डित्वाट्टिलोपः हेपितः हेपितरौ हेपितरः पित
रं पितरौ पितॄन् पित्रा पितृभ्यां पितृभिः पित्रे पितृभ्यां पितृ
भ्यः ऋतोडउ पितुः पितृभ्यां पितृभ्यः पितुः पित्रोः पितॄणां
ङौ ऋकारस्यारभवति ङौपरे पितरि पित्रोः पितृषु नवातां
मिदीर्घः नशब्दस्यावादीर्घोभवतिनामिपरे नॄणां नृणां कर्त

शब्दस्य पंचस्वविशेषः ऋतार् सकारस्यात्ययःसंबंधिनःऋकारस्या
रभवतिपंचसुरूपेषुकर्त्तारमिति स्थितेयत्रादेशात्तद्भवति सेरा
तस्याडित्वाद्दिलोपः कर्त्ता कर्त्तारौ कर्त्तारः हेकर्त्तः हेकर्त्तारौ हेक
र्त्तारः कर्त्तारं कर्त्तारौ कर्तॄन् कर्त्रा कर्तृभ्यां कर्तृभिः कर्त्रे कर्तृभ्यां
कर्तृभ्यः कर्तुः कर्तृभ्यां कर्तृभ्यः कर्तुः कर्त्रोः कर्तॄणां कर्त्तरि कर्त्रोः
कर्तृषु एवंनप्तृनेष्टृत्वष्टृप्रशास्तृप्रभृतयः स्वसानप्ता चनेष्टा
त्वष्टाक्षत्तातथैवच होतापोताप्रशास्ताचअष्टौस्वस्रादयःस्मृता
इत्यादि क्रोष्टुशब्दस्य भेदः उकारांतोऽपिक्रोष्टुशब्दःसप्तसुस्वादि
षुप्रत्ययांतस्यवद्रूपंवक्तव्यः क्रोष्टाः क्रोष्टारौ क्रोष्टारः ।। संबो
धिविशेषणात् हेक्रोष्टो हेक्रोष्टारौ हेक्रोष्टारः क्रोष्टारं क्रो।

तिसंहिता मेघदाहस्यो नामः मेघराजा युधिष्ठिरः मेघकार्णो
महाख्यागोमे वभीमो महाबलः १ इस्मादौ पादपूर्णेस्मर्थो
यडक्के लौलिकायेह नहे हे वतुलंभेवेत मेम्याभूम्यादेशेला
मिन्यादीनामडष्टता २ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्वि
भाषा क्वचिदन्यदेव विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बा
हुलकं वदन्ति ३ वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णवि
कारनाशौ धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं नि
रुक्तं ४ वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः षोडशादौ
विकारस्याद्वर्णनाशः पृषोदरे ५ वर्णनाशविकृत्याभ्यां धातोर
तिशयेन यः योगस्स उच्यते प्राज्ञैः मयूरभ्रमरादिषु ६ इति
विसर्गसंधिः समाप्तः ॥५॥ अथ हलिभक्तिर्विभाव्यते ॥